N.A.

Nyaya satakam

न्याय शतकम्

Sanskrit


Paper — Handwritten

N.A.

8 folio (bound)

7.2"x 4.8"

Complete



THE UNIVERSAL EXERCISE BOOK.

Written by

....

A. C. PAUL,

Paper Dealer and Exercise Books Manufacturer.

32, Simla Street, CALCUTTA.

ॐ

श्री रामेश्वर शास्त्रि प्रोक्तम्

न्याय शतकम्

विन्यस्य चित्तं शैलेन्द्रकन्याधीश पदाम्बुजे ।
सन्याय शतकं वक्ष्ये, धन्य विद्वत्सुखावहम् ॥ १॥

श्रीचन्द्रमौले मां रक्ष नीचैः प्राग्लोकरक्षणात् ।
सूचीकटाह न्यायादालोचने स्थूल सूक्ष्मयोः ॥ २॥

वाचस्पति नुताङ्घ्रे त्वां वाचा कलयतां नृणां ।
वीचीतरङ्ग न्यायात्स्युः प्राचुर्येणैव सम्पदः ॥ ३॥

स्वयंज्योतिस्स्वरूप त्व मन्तर्यामिन्महेश्वर ।
कथं शम्भो बहिर्घट दीपन्यायान्न भाससे ॥ ४॥

शम्भो कटाक्षलेशोऽपि मयि न्यस्तो भवेद्यदि ।
भक्त्यैव चालित वटबीजन्यात्प्रवर्धते ॥ ५॥

महादेव मदीयौतौ रागद्वेषौ पुनः पुनः ।
निष्कृष्य सुन्दोपसुन्दन्यायान्नाशय सत्वरं ॥ ६ ॥

गौरीश मिथ्याज्ञानं मे निवारय तदाश्रितं ।
दोषादिकं तदा दण्डापूपन्यायाद्विवर्तते ॥ ७ ॥

गौरीश त्वत्कटाक्षेतु सत्यसत्येकदा श्रियः ।
खलेकपोतन्यायात्स्यु स्ता स्थिता अस्थितान्नृषु ॥ ८ ॥

गौरीरमण ते रूपं सततं ध्यायतो मम ।
सम्पादय त्वं भ्रमरकीटन्यायात्स्वरूपतां ॥ ९ ॥

स्वव्यापारेणैव बध्वा मच्चित्तं निश्चलं कुरु ।
गिरिजाधिपते गोधापुच्छन्यायादिहाद्भुतं ॥ १० ॥

ज्ञानमालम्ब्य मच्चित्तं कर्मत्यजति सं चितं ।
गौरीश तृणजलूकन्यायात्त्वत्कृपया ध्रुवम् ॥ ११ ॥

कटाक्षो मयि निक्षेप्यः इहामुत्र स एव हि ।
गौरीरमण काकाक्षिन्यायादन्वेति सिद्धये ॥ १२ ॥

त्वामदृष्ट्वा मम मनो विषयेषु प्रवर्तते ।
यच्चात्वापूवगन्यात्प्रदर्शय फलं शिव ॥ १३ ॥

धावन्तमनु धावत्वं मां त्वन्नामानुवादिनम् ।
गौरीनायक गोवत्स न्यायादीश मुहुर्मुहुः ॥ १४ ॥

न्यस्य मध्ये जन्ममृत्यो मां वृथा बाधसे मुहुः ।
ईश सन्दंशिनीन्यायान्मां मुञ्च कृपया भृशम् ॥ १५ ॥

स्वामी त्वमेव लोकानां भृत्योऽहं तव शङ्कर ।
द्राक्स्वामिभृत्यन्यायाद्वा मह्यं देह्यधिकश्रियम् ॥ १६ ॥

विद्यागुरुस्त्वं सर्वेषां शिष्यम्मामनुगृह्णन्व ।
स्वच्छां विद्यामीश गुरुशिष्यन्यात्प्रयच्छमे ॥ १७ ॥

महादेव मद्रूपं प्रदर्श्य कृपया मम ।
त्वं स्थूलारुन्धतिन्यायादणुरूपं प्रदर्शय ॥ १८ ॥

भुक्तिं सम्पादितानन्दे त्वं मुक्तिः प्रच्यवते मम ।
शम्भो तुन्दिलसुरतन्यायादेतद्द्वयं कुरु ॥ १९ ॥

दोषान् बहूनधः कृत्वा गुणानेव स्फुटीकुरु ।
गौरीश-चालनी-न्यायान्मम विज्ञापने सती ॥ २० ॥

जन्मप्रभाति मे भक्तिस्त्वयि संजायते पुनः ।
स्थूणानिखनन न्यायात्तां दृढीकुरु शङ्कर ॥ २१ ॥

उपर्युपरिजातं चेत्पूर्वं पूर्वं विनश्यति ।
कदम्बमुकुलन्यायाज्जगच्छम्भो तवाज्ञया ॥ २२ ॥

कारणं कर्त्वं कर्मे भक्तिः कलौ त्वस्तु सुदमः शिव ।
सकाक तालन्यायात्स्यादिति निश्चित्य रक्ष मां ॥ २३ ॥

एतस्येऽपि कृतं पापं ज्ञात्वा प्रहरसीश मां ।
तद्धट कुटी प्रभात न्याया त्किं नु पृथग्भवेत् ॥ २४॥

अन्धचलाया मद्भक्तेः स्वदृढानुग्रहस्य च ।
शम्भो सती पति न्याया त्कृत्वा सा त्किं सदा न मां ॥ २५॥

जन्मना न निपात्येहं तस्मिन् बलवदारिणा ।
मत्स्यन्यायाद्बाधितश्चे त्किं फलं तो वदेश्वर ॥ २६॥

गौरीश त्वां समुद्दिश्य परिभ्रमय मे मनः ।
कुलाल-चक्र न्यायाद्वा त्वं भ्रमीहि न चान्यथा ॥ २७॥

दोषाकुलस्य मे प्रायो भक्तिमार्गं निरीक्ष्यते ।
स्थालीपुलाक न्यायाद्वा पालनीयोऽस्मीश्वर ॥ २८॥

कैलासवासिन्मां पश्य दूरस्थं कृपयेश्वर ।
सिंहावलोकन न्याया त्सुर सिंह गजान्तक ॥ २९॥

गृहीत्वा तव पादाब्जं न त्यजत्यम्बिकापते ।
निर्भर्त्सनेऽपि मर्कटमुष्टिन्यायाद्धि मे मनः ॥ ३० ॥

गौरीश त्वयि मद्भक्तेर्बोधं जनय निर्मलम् ।
लोके बीजाङ्कुरन्यायात्सततं सततो भवेत् ॥ ३१ ॥

सऐहिकसुखेनेश ममज्ञानौषधं दिश ।
द्राग्गुडजिह्विकान्यायाद्भवरोग निवृत्तये ॥ ३२ ॥

अन्तःकरणवृत्तिर्मे त्वदाकारास्ति शङ्कर ।
चित्रं घुणाक्षरन्यायात्ततः साक्षात्कृतो भव ॥ ३३ ॥

त्वां विना विषयेष्वेव मसुखेष्वस्थिरेषु च ।
शम्भो मरुमरीचिका न्यायाद्धावति मे मनः ॥ ३४

गौरीश त्वमनाधारस्त्वनाधेयं हि मे मनः ।
द्राङ्नष्टदग्धरथन्यायाद्योजय तद्द्वयम् ॥ ३५

ईशानुग्रसर्वेश त्वद्वाक्यं सकृदीरितम् ।
तन्त्रन्यायात्फलति मे ह्यनेकार्थोपकारकम् ॥ ३६ ॥

ज्ञानाज्ञानलवान् शम्भो तांस्तेजास्तिरोपमान् ॥
मदीयान्तिलतण्डुलन्यायान्मिश्रान्पृथक्कुरु ॥ ३७ ॥

श्रितकल्पद्रुमेशान चित्तवृत्तिर्ममानिशं ।
त्वान्तु वृक्षलतान्यायात्परितोनवृत्तेह्यहो ॥ ३८ ॥

आनन्दैकरसं त्वान्तु हित्वान्यद्विषयान्तरम् ।
घृतकोशातकीन्यायाद्दिच्छतीश्वर मे मनः ॥ ३९ ॥

विषयैर्भग्नमपि मे चेतस्संसज्यते त्वयि ।
तेजस्विन्नीश्वरजतुकाष्ठन्यायाद्दिवानिशम् ॥ ४० ॥

प्रारब्धकर्मानुभवो मां नत्यजति संप्रति ।
सगले पादुकान्यायात्प्रसन्नोपि त्वयीश्वर ॥ ४१ ॥

स्वयं प्रकाशरूपस्त्वं मयि स्थित्वा निवारय ।
क्षिप्रं मे देहलीदीपन्यायाद्बाह्यान्तरं तमः ॥ ४२॥

त्वत्कटाक्षेण मय्यन्तः सर्वं पापचयं हर ।
गौरीश गजकपित्थन्यायादेवामिशङ्कुतं ॥ ४३॥

मायाबन्धोऽस्ति दुस्त्याज्यो मम जन्मनि जन्मनि ।
गौरीश शृङ्खलान्यायात्तं छिन्दि कृपया द्रुतम् ॥ ४४॥

सूक्ष्मापि चित्तवृत्तिर्मे त्वामाश्रित्याति विस्तृता ।
शम्भो जलतैलबिन्दुन्यायादेव भवत्यलम् ॥ ४५॥

त्वदन्यदेवनिन्दा मे न दोषाय हि सा पुनः ।
गौरीपते न हि निन्दान्यायात्ते स्तुतये ध्रुवम् ॥ ४६॥

सुखिनं कुरु मां नित्यं दुःखिनं हर शङ्कर ।
अस्मिन् सविशेषणे हि न्यायाद्विधि निषेध धीः ॥ ४७॥